# Shri Pamchamukha Hanumat Hridayam

# શ્રીપઞ્ચમુખ હનુમત્ હૃદયમ્

## Document Information

Text title : panchamukhahanumathRidayam

File name : panchamukhahanumathRidayam.itx

Category : hRidaya, hanumaana

Location : doc_hanumaana

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran proofreadaeaswaran at gmail.com

Source : ParAsharasamhita Vol 2 page 1

Latest update : May 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# શ્રીપઞ્ચમુખ હનુમત્ હૃદયમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીસીતારામચન્દ્રાભ્યાં નમઃ ॥

ૐ અસ્ય શ્રીપઞ્ચવક્ત્ર હનુમત્ હૃદયસ્તોત્રમન્ત્રસ્ય
ભગવાન્ શ્રીરામચન્દ્ર ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ ।
શ્રીપઞ્ચવક્ત્ર હનુમાન્ દેવતા । ૐ બીજમ્ ।
રુદ્રમૂર્તયે ઇતિ શક્તિઃ । સ્વાહા કીલકમ્ ।
શ્રીપઞ્ચવક્ત્ર હનુમદ્દેવતા પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ઇતિ ઋષ્યાદિ ન્યાસઃ ॥

ૐ હ્રાં અઞ્જનાસુતાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં રુદ્રમૂર્તયે તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં વાયુપુત્રાય મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં અગ્નિગર્ભાય અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં રામદૂતાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ પઞ્ચવક્ત્રહનુમતે કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

ૐ હ્રાં અઞ્જનાસુતાય હૃદયાય નમઃ ।
ૐ હ્રીં રુદ્રમૂર્તયે શિરસે સ્વાહા ।
ૐ હ્રૂં વાયુપુત્રાય શિખાયૈ વષટ્ ।
ૐ હ્રૈં અગ્નિગર્ભાય કવચાય હુમ્ ।
ૐ હ્રૌં રામદૂતાય નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ પઞ્ચવક્ત્રહનુમતે અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિ ષડઙ્ગન્યાસઃ ।
ૐ ભૂર્ભુવઃ સ્વરોમિતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ।

ધ્યાયેદ્બાલદિવાકરદ્યુતિનિભં દેવારિદર્પાપહં
દેવેન્દ્રપ્રમુખૈઃ પ્રશસ્તયશસં દેદીપ્યમાનં રૂચા ॥

સુગ્રીવાદિસમસ્તવાનરયુતં સુવ્યક્તતત્ત્વપ્રિયં
સંરક્તારુણલોચનં પવનજં પીતામ્બરાલઙ્કૃતમ્ ॥

ઇતિ ધ્યાનમ્ ॥

ૐ નમો વાયુપુત્રાય પઞ્ચવક્ત્રાય તે નમઃ ।
નમોઽસ્તુ દીર્ઘબાલાય રાક્ષસાન્તકરાય ચ ॥ ૧॥

વજ્રદેહ નમસ્તુભ્યં શતાનનમદાપહ ।
સીતાસન્તોષકરણ નમો રાઘવકિઙ્કર ॥ ૨॥

સૃષ્ટિપ્રવર્તક નમો મહાસ્થિત નમો નમઃ ।
કલાકાષ્ઠસ્વરૂપાય માસસંવત્સરાત્મક ॥ ૩॥

નમસ્તે બ્રહ્મરૂપાય શિવરૂપાય તે નમઃ ।
નમો વિષ્ણુસ્વરૂપાય સૂર્યરૂપાય તે નમઃ ॥ ૪॥

નમો વહ્નિસ્વરૂપાય નમો ગગનચારિણે ।
સર્વરમ્ભાવનચર અશોકવનનાશક ॥ ૫॥

નમો કૈલાસનિલય મલયાચલ સંશ્રય ।
નમો રાવણનાશાય ઇન્દ્રજિદ્વધકારિણે ॥ ૬॥

મહાદેવાત્મક નમો નમો વાયુતનૂદ્ભવ ।
નમઃ સુગ્રીવસચિવ સીતાસન્તોષકારણ ॥ ૭॥

સમુદ્રોલ્લઙ્ઘન નમો સૌમિત્રેઃ પ્રાણદાયક ।
મહાવીર નમસ્તુભ્યં દીર્ઘબાહો નમોનમઃ ॥ ૮॥

દીર્ઘબાલ નમસ્તુભ્યં વજ્રદેહ નમો નમઃ ।
છાયાગ્રહહર નમો વરસૌમ્યમુખેક્ષણ ॥ ૯॥

સર્વદેવસુસંસેવ્ય મુનિસઙ્ઘનમસ્કૃત ।
અર્જુનધ્વજસંવાસ કૃષ્ણાર્જુનસુપૂજિત ॥ ૧૦॥

ધર્માર્થકામમોક્ષાખ્ય પુરુષાર્થપ્રવર્તક ।
બ્રહ્માસ્ત્રબન્ધ ભગવન્ આહતાસુરનાયક ॥ ૧૧॥

ભક્તકલ્પમહાભુજ ભૂતબેતાલનાશક ।
દુષ્ટગ્રહહરાનન્ત વાસુદેવ નમોઽસ્તુતે ॥ ૧૨॥

શ્રીરામકાર્યે ચતુર પાર્વતીગર્ભસમ્ભવ ।
નમઃ પમ્પાવનચર ઋષ્યમૂકકૃતાલય ॥ ૧૩॥

ધાન્યમાલીશાપહર કાલનેમિનિબર્હણ ।
સુવર્ચલાપ્રાણનાથ રામચન્દ્રપરાયણ ॥ ૧૪॥

નમો વર્ગસ્વરૂપાય વર્ણનીયગુણોદય ।
વરિષ્ઠાય નમસ્તુભ્યં વેદરૂપ નમો નમઃ ।
નમસ્તુભ્યં નમસ્તુભ્યં ભૂયો ભૂયો નમામ્યહમ્ ॥ ૧૫॥

ઇતિ તે કથિતં દેવિ હૃદયં શ્રીહનૂમતઃ ।
સર્વસમ્પત્કરં પુણ્યં સર્વસૌખ્યવિવર્ધનમ્ ॥ ૧૬॥

દુષ્ટભૂતગ્રહહરં ક્ષયાપસ્મારનાશનમ્ ॥ ૧૭॥

યસ્ત્વાત્મનિયમો ભક્ત્યા વાયુસૂનોઃ સુમઙ્ગલમ્ ।
હૃદયં પઠતે નિત્યં સ બ્રહ્મસદૃશો ભવેત્ ॥ ૧૮॥

અજપ્તં હૃદયં ય ઇમં મન્ત્રં જપતિ માનવઃ ।
સ દુઃખં શીઘ્રમાપ્નોતિ મન્ત્રસિદ્ધિર્ન જાયતે ॥ ૧૯॥

સત્યં સત્યં પુનઃ સત્યં મન્ત્રસિદ્ધિકરં પરમ્ ।
ઇત્થં ચ કથિતં પૂર્વં સામ્બેન સ્વપ્રિયાં પ્રતિ ॥ ૨૦॥

મહર્ષેર્ગૌતમાત્પૂર્વં મયા પ્રાપ્તમિદં મુને ।
તન્મયા પ્રહિતં સર્વં શિષ્યવાત્સલ્યકારણાત્ ॥ ૨૧॥

ઇતિ શ્રીપરાશરસંહિતાન્તર્ગતે શ્રીપરાશરમૈત્રેયસંવાદે
શ્રીપઞ્ચમુખહનુમત્ હૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

(શ્રીપઞ્ચવક્ત્રહનુમત્ હૃદયસ્તોત્રમ્)

Encoded by Gopal Upadhaya gopal.j.upadhyay gmail.com
Proofread by Gopal Upadhaya, PSA Easwaran proofreadaeaswaran at gmail.com

*Shri Pamchamukha Hanumat Hridayam*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*